इति रमानाथः॥ कर्म्मसु प्रलय उत्साह इति नयनानन्दः। अध्यवक्ये बलोद्यम उत्साहः। इति केचित्।" इत्यमरटीकायां भरतः॥ ( यथा, कथासरित्सागरे। १६। ६७।
"सोऽस्याः प्रोत्साहविश्लेषदुःखं यावदपपोहति।
तावत् मन्मावतीपार्श्वं प्रययुस्ते महत्तराः॥")

प्रोथ, ऋ न पर्य्याप्तौ। इति कविकल्पद्रुमः॥(भ्वा०-उभ०-अक०-सेट्।) रेफयुक्तः। ऋ, अपुप्रोथत्। न, प्रोथति प्रोथते। पर्य्याप्तं सामर्थ्यम्। पुप्रोथास्ते न कश्चन। पर्य्याप्तं परिपूर्णता। इति गोविन्दभट्टः। इति दुर्गादासः॥

प्रोथः, पुं, क्ली, ( प्रवते इति। प्रुङ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २।१२। इति थक्। निपातनात् गुणः। यद्वा, प्रोथते इति। प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः।) अश्वनासिका। इत्यमरः।२।८।४९॥ (यथा, माघे ११।११।
"रिरसयिषति भूयः शष्पमग्रे विकीर्णं
पटुतरचपलौष्ठः प्रस्फुरत्प्रोथमश्वः॥"
शूकरनासिकापि। यथा, देवीभागवते। ५। २८। २५।
"वाराहौ शूकराकारा गूढ़प्रोथा सटाभृता॥")

प्रोथः, पुं, ( प्रोथते इति। प्रोथ पर्य्याप्तौ + "पुंसि संज्ञायां घः प्रायेण।" ३।३।११८। इति घः। यद्वा, प्रुङ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २।१२। इति थक्। निपातनात् गुणः।) कटी। इति मेदिनी। थे, १०॥ शाटकः। इति त्रिकाण्डशेषः॥ स्त्रीगर्भः। इति विश्वः॥ गर्त्तः। भीषणम्। स्फिक्। अध्वसुखम्। इति संक्षिप्तसारोणादिवृत्तिः॥

प्रोथः, त्रि, ( प्रवते इति। प्रुङ् गतौ + "तिथपृष्ठगूथयूथप्रोथाः।" उणा० २।१२। इति थक्। निपातनात् गुणः।) अध्वगः। इति मेदिनी। थे, १०॥ प्रथितः। इति त्रिकाण्डशेषः॥ स्थापितः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

प्रोषः, पुं, ( प्रुष दाहे + भावे घञ्।) सन्तापः। इति राजनिर्घण्टः॥

प्रोषितः, त्रि, ( वस् + क्त। इट्। सम्प्रसारणम्। प्रकर्षदूरं उषितः।) प्रवासगतः। यथा,—
"आर्त्तार्त्ते मुदिता हृष्टे प्रोषिते मलिना कृशा।
मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता॥"
इति शुद्धितत्त्वम्॥
( दूरीभूतः। यथा, कलाविलासे। १। १४।
"मिहिततहस्तलितिधिवशो
रुचिरः प्रद्यामरीचिनिचयस्ते।
तीक्ष्णांशोरिव सद्यः
प्रोषिततिमिराः करोत्याशाः॥")

प्रोषितभर्तृका, स्त्री, ( प्रोषितो विदेशगतो भर्त्ता यस्याः। समासान्तकप्रत्ययः।) विदेशस्थपतिका। इति जटाधरः॥ स्वीयादिनायिकाभेदः। तस्या लक्षणं यथा। देशान्तरे गते भर्त्तरि सन्तापाकुला प्रोषितभर्तृका। अस्याश्चेष्टा दशावस्था। यथा। पत्यभिलाषः १ चिन्ता २ स्मृतिः ३ गुणोत्कीर्त्तनम् ४ उद्वेगः ५ विलापः ६ उन्मादः ७ व्याधिः ८ जड़ता ९ निधनम् १०। मुग्धा प्रोषितभर्तृका यथा,—
"दुःखं दीर्घतरं वहन्त्यपि सखीवर्गाय नो भाषते
शैवालैः शयनं सृजन्त्यपि पुनः शेते न वा लज्जया।
कण्ठे गद्गदवाचमञ्चति दृशा धत्ते न वाष्पोदकं
सन्तापं सहते यदम्बुजमुखी तद्वेद चेतोभवः॥"
मध्या प्रोषितभर्तृका यथा,—
"वासरदेव वपुषो वलयस्तदेव
हस्तस्य सैव जघनस्य च रत्नकाञ्ची।
वाचालभृङ्गसुभगे सुरतौ समस्त-
मध्याधिकं भवति तत् सखि किन्निदानम्॥"
प्रगल्भा प्रोषितभर्तृका यथा,—
"माला बालाम्बुजदलमयी मौक्तिकी हारयष्टिः
काञ्ची स्थानात् प्रवरति करौ सुभ्रुवः प्रस्थितेव।
अन्यद्ब्रूमः किमपि धमनी विद्यते वा नवेति
त्रातुं बालोरहह वलयं पाणिमूलं प्रयाति॥"
परकीया प्रोषितभर्तृका यथा,—
"श्वश्रूः पन्नगदलं ददाति तदपि भ्रूसंज्ञया गृह्णते
सद्यो मर्म्मरशङ्कया न च तया संस्पृश्यते पाणिना।
यातुर्य्यापि सुकुड्मलस्य वचसा प्रत्युत्तरं दीयते
भावः किन्तु न मुच्यते कुतपहकूटः कुरङ्गीदृशा॥"
सामान्यवनिता प्रोषितभर्तृका यथा,—
"विरहविदितमन्तःप्रेम विज्ञाय कान्तः
पुनरपि वसु तस्मादेष्य मे दास्यतीति।
भरिपनिचयमद्ध्योर्व्वेश्य वाष्पोदबिन्दून्
सृजति च पुरयोषिद्वारदेशोपविष्टा॥"
इति रसमञ्जरी॥
( अस्याः चक्रसेनं चतुर्त्तं चिन्तामणौ तद्यथा,
"हास्यं परगृहे यानं समाजोत्सवदर्शनम्।
क्रीड़ां शरीरसंस्कारं त्यजेत् प्रोषितभर्तृका॥")

प्रोष्ठः, पुं, ( प्रकृष्ट ओष्ठोऽस्येति। "ओत्वोष्ठयोः समासे वा।" ६।१।६४। इत्यस्य वार्त्तिकोक्त्या साधुः।) प्रोष्ठीमत्स्यः। इत्यमरटीकायां रायमुकुटः॥ ( जनपदविशेषः। यथा, महाभारते। ६। ९। ६१।
"चूड़काः कोरकाः प्रोष्ठाः समवेगवशास्तथा॥"
गौः। इति सिद्धान्तकौमुदी। ५। ४। १२०॥)

प्रोष्ठपदः, पुं, ( प्रोष्ठो गौस्तस्येव पादौ यस्य सः। "सुप्रातसुश्वसुदिवेति।" ५।४।१२०। इति अच् प्रत्ययेन साधुः। प्रोष्ठपदो नक्षत्रविशेषस्तद्युक्ता पौर्णमासी यत्र मासे। अण्। पदे न वृद्धिः।) भाद्रमासः। इत्यमरः॥ ( नक्षत्रविशेषः। यथा, महाभारते। ६। ३। १४।
"शुक्रः प्रोष्ठपदे पूर्व्वे समारुह्य विरोचते॥"
यथा च मार्कण्डेये। ३३। १५।
"अजाविकं प्रोष्ठपदे विन्देद्भार्य्यासयोत्तरे॥"
गोतुल्यपदयुक्ते, त्रि। इति व्याकरणम्॥)

प्रोष्ठपदाः, स्त्री, ( प्रोष्ठो गौस्तस्येव पादा यासाम्। "सुप्रातसुश्वेति।" ५।४।१२०। इति बहुव्रीहावच् पद्भावश्च निपातितः।) पूर्व्वभाद्रपदनक्षत्रम् २५। उत्तरभाद्रपदनक्षत्रम् २६। तत्पर्य्यायः। भाद्रपदाः २। इत्यमरः। १। ३। २२॥ द्वे पूर्व्वभाद्रपदोत्तरभाद्रपदासु प्रोष्ठो गौः भद्रश्च गौः तस्येव पाद आसां तास्तथा। पूर्व्वे प्रोष्ठपदे द्वे उत्तरे तु भाद्रपदे द्वे समुदायश्चासां चतुःसंख्य इति बहुवचनम्। कदा पूर्व्वे प्रोष्ठपदे कदा उत्तरे प्रोष्ठपदे इति तारकयोर्द्वित्वाद्विवचनम्। इति भरतः॥ भाद्रपदशब्देन तारकाविशेषाणां समुदाय उच्यते तिरोहितावयवभेदपक्षे एकवचनम्। प्रोष्ठपदाशब्दस्तु दिक्षावयवभेदपक्षे बहुवचनमिति मैत्रेयः। इति रायमुकुटः॥

प्रोष्ठपदी, स्त्री, ( प्रोष्ठपदाभिर्युक्ता पौर्णमासी। अण्। स्त्रियां ङीप्।) भाद्री पूर्णिमा। यथा,—
"प्रोष्ठपद्यामतीतायां तथा कृष्णा त्रयोदशी।
एतांस्तु श्राद्धकालान् वै नित्यानाह प्रजापतिः॥"
इति तिथ्यादितत्त्वम्॥
अपि च।
"लिखित्वा तच्च यो दद्याद्धेमसिंहसमन्वितम्।
प्रोष्ठपद्यां पौर्णमास्यां स याति परमां गतिम्॥"
इति श्रीभागवतटीकायां श्रीधरस्वामी॥

प्रोष्ठपादः, त्रि, ( प्रोष्ठपद + "सन्धिवेलेति।" ४। ३। १६। इत्यण्। "जे प्रोष्ठपदानाम्।" ७।३। १८। इति उत्तरपदस्याचामादेरचो वृद्धिः।) प्रोष्ठपदासु जातः। इति सिद्धान्तकौमुदी॥

प्रोष्ठी, स्त्री, पुं, ( प्रकृष्ट ओष्ठो यस्याः। "ओत्वोष्ठयोः समासे वा।" नासिकोदरोष्ठेति जातेरिति वा ङीष्।) मत्स्यभेदः। पुँटी माछ इति भाषा। तत्पर्य्यायः। शफरी २ शफरः ३। इत्यमरः॥ श्वेतकोलः ४। इति शब्दरत्नावली॥ तस्या गुणाः। तिक्तत्वम्। कटुत्वम्। स्वादुत्वम्। शुक्रकारित्वम्। कफवातनाशित्वञ्च। इति राजवल्लभः॥ स्निग्धत्वम्। आस्यकण्ठरोगनाशित्वम्। अहृद्यत्वञ्च। इति राजनिर्घण्टः॥

प्रोहः, पुं, (प्रोह्यते वितर्क्यते विक्षयाङ्गुलिरिति। प्र + ऊह् + घञ्।) हस्तिपदः। पर्व्व। इति विश्वमेदिन्यौ। हे, ५। गजपदग्रपर्व्व। इति त्रिकाण्डशेषशब्दरत्नावल्यौ॥

प्रोहः, त्रि, ( प्रकर्षेण ऊहते वितर्कयतीति। प्र + ऊह + कः।) निपुणः। ( प्र + ऊह + भावे घञ्।) तर्कः। इति मेदिनी। हे, ६॥

प्रौढ़ं, त्रि, (प्रोह्यते स्मेति। प्र + वह् + क्तः। सम्प्रसारणम्। "प्रादूहोढोढ्येषैष्येषु।" इति वृद्धिः।) वर्द्धितम्। तत्पर्य्यायः। प्रवृद्धम् २ एधितम् ३। इत्यमरः। ३। १। ७६॥ (यथा, मेघदूते। २७।
"लक्ष्यम्यक्रात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः॥")